# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री | प्रश्नपत्रम् – ७ | गुणाः – ५० |
| विषयः – क्रियात्मकसंस्कृतशिक्षणम् | सत्रम् – ६ (OLD) | समयः – १०:०० तः १२:०० |
| दिनाङ्कः – २०/०७/२०२१ | सन्दर्भग्रन्थः – संक्षेपरामायणम् | |

सूचना - निम्नलिखितेषु दशसु प्रश्नेषु केचित् पञ्च प्रश्नाः विधेयाः।
प्रत्येकं प्रश्नस्य समानगुणाः। (१०)

**प्रश्नः १ कयोश्चिद् द्वयोः श्लोकयोः व्यख्या कार्या।** १०

१ को न्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान्।
धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः।।

२ चारित्रेण च को युक्तः सर्वभूतेषु को हितः।
विद्वान् कः कः समर्थश्च कश्चैकप्रियदर्शनः।।

३ आत्मवान् को जितक्रोधो द्युतिमान् कोऽनसूयकः।
कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे।।

**प्रश्नः २ रामस्य वनं प्रति विवासनं तथा लक्ष्मणेन रामस्य अनुगमनं स्वशब्दैः वर्णयत।** १०

**प्रश्नः ३ चित्रकूटप्राप्तिः तथा दशरथस्य प्रयाणं स्वशब्दैः वर्णयत।** १०

**प्रश्नः ४ कयोश्चिद द्वयोः श्लोकयोः व्यख्या कार्या।** १०

१ ततः शूर्पणखावाक्यादुद्युक्तान् सर्वराक्षसान्।
खरं त्रिशिरसं चैव दूषणं चैव राक्षसम्।।

२ निजघान रणे रामस्तेषां चैव पदानुगान्।
वने तस्मिन्निवसता जनस्थाननिवासिनाम्।।

३ रक्षसां निहतान्यासन् सहस्राणि चतुर्दश।
ततो ज्ञातिवधं श्रुत्वा रावणः क्रोधमूर्छितः।।

**प्रश्नः ५ 'रक्षसां वधाय रामस्य प्रतिज्ञा तथा रावणेन सीतायाः हरणं' स्वशब्दैः वर्णयत।** १०

**प्रश्नः ६ 'सीतायाः अन्वेषणं तथा रामेण कबन्धस्य निहननं' स्वशब्दैः वर्णयत।** १०

**प्रश्नः ७ कयोश्चिद् द्वयोः श्लोकयोः व्याख्या कार्या।** १०

१ ततोऽग्निवनात्सीतां ज्ञात्वा विगतकल्मषाम्।
कर्मणा तेन महता त्रैलोक्यं सचराचरम्।।

२ सदेवर्षिगणं तुष्टं राघवस्य महात्मनः।
बभौ रामः संप्रहृष्टः पूजितः सर्वदैलतैः।।

३ भरद्वाजाश्रमं गत्वा रामः सत्यपराक्रमः।
भरतस्यान्तिके रामो हनूमन्तं वयसर्जयत्।।

**प्रश्नः ८ रामेण सीतायाः स्वीकरणम् तथा लङ्काराज्ये विभीषणस्य अभिषेकः स्वशब्दैः वर्णयितव्यः।** १०

**प्रश्नः ९ 'रामस्य अयोध्यां प्रति प्रस्थानम् तथा अयोध्यां प्रति हनुमतः प्रेषणं' स्वशब्दैः वर्णनीयम्।** १०

**प्रश्नः १० निम्नलिखितेषु प्रश्नेषु दशनां प्रश्नानां लघूत्तरं देयम्।**

१ जनैः कीदृशः रामः श्रुतः ? १०
२ रामः गाम्भीर्ये कीदृशः ?
३ रामः त्यागे केन समः ?
४ सत्ये कः इव ?
५ कालाग्निसदृशः इत्यत्र कः समासः ?
६ युज् + क्त =
७ दत्तवरा इत्यत्र कः समासः ?
८ कः राजा विवासयामास ?
९ दशरथं कं सुतं विवासयामास ?
१० लक्ष्मणः कम् अनुजगाम ?
११ दशरथस्य कति पुत्राः आसन् ?
१२ सङ्क्षेपरामायणं कस्य ग्रन्थस्य भागः वर्तते ?
१३ 'मदात्मनः' इत्यत्र प्रातिपदिकं किम् ?
१४ 'तुष्ट' इत्यत्र कः प्रत्ययः ?
१५ 'बिभ्यति' इत्यत्र कः धातुः, कः लकारः, किञ्च वचनम् ?

****